वैदिककृषिप्रणाल्याः परिप्रेक्ष्ये महर्षिपराशराभिमतानां विश्लेषणात्मकम् अध्ययनम्

राँची-विश्वविद्यालये संस्कृतविभागे विद्यावारिधिः(Ph.D) इत्युपाधिप्राप्तये प्रस्तुतोऽयं शोधविषयः।

मानविकी-संकायः

2024

शोध-निर्देशिका

डॉ. सबिता उराँव
सहायिका प्राध्यापिका
संस्कृतविभागः,राँची वीमेंस कॉलेज
राँची विश्वविद्यालय, राँची

शोधार्थी

दिलीप कुमार सरकार
(NET, SET)

वैदिककृषिप्रणाल्याः परिप्रेक्ष्ये महर्षिपराशराभिमतानां

विश्लेषणात्मकम् अध्ययनम्

(Analytical study of the views of Maharishi

Parashara in the context of

Vedic agriculture)

अनुक्रमणिका

विषयसूची-

1. प्रस्तावना (Introduction)
2. क्षेत्रम् (Aera)
3. उद्देश्यम् (Objective)
4. कृतपूर्वशोधकार्याणि (Literature review)
5. शोधनपद्धतिः (Methodology)
6. अध्यायविभाजनम् (Chapter division)

6. 1. पृष्ठभूमिः

6. 2. वेदकालीनकृषिप्रणाली -

(i) ऋग्वेदः (ii) यजुर्वेदः (iii) अथर्ववेदः

6. 3. महर्षिपराशरकालीनकृषिप्रणाली -

(i) पूर्वप्रस्तुतिः (ii) वीजवपनम् (iii) परिचर्या (iv) सस्यानां संग्रहः संरक्षणम् च

6. 4. आधुनिककृषिप्रणाली -

(i) पूर्वप्रस्तुतिः (ii) वीजवपनम् (iii) परिचर्या (iv) सस्यानां संग्रहः संरक्षणम् च

6. 5. वैदिकाभिमतानां पराशराभिमतानां आधुनिकमतानाञ्च समीक्षणम्

6. 6. महर्षिपराशराभिमतानां वर्तमानप्रयोजनीयता

- उपसंहारः
- सहायकग्रन्थसूची

1. प्रस्तावना(Introduction)

अन्नेन आहारेन वा आधारितमिदं जीवजगत् सदा गतिमानं वर्तते।अन्नसमुहानाम् उत्पादनम् प्राप्तिर्वा कृषिकार्येनैव सम्भवति। वैश्विककृषिकार्यस्य आधारेन अस्माकं भारतदेशोऽयं द्वितीयस्थानम् अधिकृत्य विराजते। भारतदेशोऽयं कृषिनिर्भरदेश इति सर्वतः स्वीकृतः।प्रायशः दशसहस्राधिकवर्षेभ्यः पूर्वं भारतदेशेऽस्मिन् कृषिकार्यस्य सुचना अभवत्।तस्मात्कारणात् वक्तुं पारयामि यत्- भारतीय-कृषिआविष्कारस्य इतिहासः प्राचीनतरेति। उपलभ्यमाने प्रथमभारतीयलिखितग्रन्थ-ऋग्वेदे कृषिविषयकं प्रशंसात्मकं वक्तव्यमिदं श्रुयते, यत्- भोः ! द्यौतक्रिडाशक्तः कितवः क्रिडाशक्तिं परित्यज्य कृषिकार्यं कुरुः,कृष्या सम्पादिते धने रतिं कुरुः,तत्रैव तव पत्नी अस्ति तत्रैव गोः सन्ति-

"अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।

तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः"।।[1] ऋ.१०.३४.१३,

तत्पश्चात् स्मृतिकारः महर्षिपराशराः कृषिकार्यस्य आवश्यकतां प्रतिपादयन् अवदत्- यद्यपि मनुष्यः हस्त-कर्ण-कण्ठादिषुसुवर्णनिर्मितेन आभुषणेन आभुषितोऽपि अन्याभावेन उपवासं करोति सदा।यथा उक्तं महर्षिपराशरेण -

"कण्ठे कर्णे च हस्ते च सुवर्णं विद्यते यदि।

उपवासस्तथापि स्यादन्नाभावेन देहिनाम्"।।[2] कृ.प.१.५

2. शोधकार्यस्य क्षेत्रम् (Area)

वैदिकसंहितायाः लिपिबद्धकरणात् प्राक् वेदाः श्रुतिः नाम्ना परिचिताः आसन्।कालक्रमेन वेदसंहितायाः लिखिताकारेण संकलनमभवत्, तत्पश्चात् विश्वजनैः वेदानां लिखितरुपम् अवलोकितम्। तस्मादारभ्य वेदेषु वर्णितविषयान् अवलोक्य विविधान्वेषणम् आरवद्धम्। वेदेषु वर्णितविषयान् प्रति आग्रहीनां जिज्ञासा क्रमशः वर्धिता।तथैव मम अपि एका जिज्ञासा - वैदिककाले कृषिप्रणाली कथमासीत् इति?

---

[1] ऋक्सूक्तमनिमाला डॉ. व्रजबिहारीचैवे,पृ.३७१

[2] कृषिपराशरः प्रो. रामचन्द्रपाण्डेयः,पृ.१७

पुनः वैदिकसाहित्ये कल्पशास्त्राधारितं स्मृतिशास्त्रानामेकं विशिष्टस्थानं वर्तते।तत्र स्मृतिशास्त्रकारेषु महर्षिपराशरः अन्यतमः। महर्षिपराशरेन विरोचितं कृषिपराशरःनाम कृषिशास्त्रं मम शोधकार्यस्य पुरोधा इति वक्तुं पारयामि।प्रथमे ऋक्-यजु-अथर्ववेदषु कृषिकार्यविषये ये ऋचाः दृष्टिगोचरिभुताः भवेयुः तेषां समीक्षात्मकाध्ययनपूर्वकं स्मृतिकार-महर्षिपराशराभिमतानां विश्लेषणात्मकम् अध्ययनं करिष्यामि।

3. शोधकार्यस्य उद्देश्यम्(Objective)

भारतदेशोऽस्माकं कृषिप्रधानदेशः अनेन वाक्येन सह प्रायशः सर्वे भारतीयजनाः सुपरिचितारपि प्राचीनभारतीय-कृषिकार्येन साकं परिचिताः जनाः स्वल्पसंक्ष्यकैव सन्ति। अतःमम शोधकार्यस्य प्रथममुद्देश्यम्- प्राचीनभारतीयकर्षण-शैल्या सुपरिचिताः भवेयुः।

द्वितीयउद्देश्यम्- वैदिककालीनं तथा स्मृतिकालीनं कृषिकार्यम् आश्रित्य इतो पूर्वं कथमपि शोधकार्यं न जातम्। वैदिकालीनकृषिविषयकाभिमतानां परिपालनेन अद्यतनदिने लाभः कः हानिःवा कः इत्यस्मिन् विषये एका स्पष्टधारणा जनिष्यते,तस्मादहम् प्रवृत्तरस्मिन् शोधकार्ये।

तृतीयउद्देश्यम्- स्मृतिकार-महर्षिपराशः प्राचीनकाले किद्दशः कृषिविशेषज्ञरासीतिति आग्रहीनः जानियुः।

इतोपि अहमस्मि जन्मतः कृषकपरिवारस्य एकः सदस्यः, वाल्यकालादेव कृषिकार्येन सह परिचितोऽस्मि। तस्मादहम् अस्मिन् विषये शेधकार्यकरणाय मनसा प्रेरितोऽस्मि।

4. कृतपूर्वशोधकार्यानि (Literature review)

कस्मिनपि विषये संशोधनकाले अवश्यमेव द्रष्टव्यं यत्- तस्मिन् विषये किमपि पूर्वसंशोधनं जातम् न वा इति। वैदिककालीन-कृषिशैलीमधिकृत्य किमपि पूर्वसंशोधनं नैव कृतं दृश्यते। पुनः स्मृतिकालीनकर्षणाभिमतानामाधारेन अपि न जातम् किमपि पूर्वसंशोधनम्। कस्मिन् अपि एम.फिल,पिएच.डि मध्ये एतत् विषयम् अधिकृत्य स्वतन्त्रसंशोधनं न कृतम्।एकवाक्येन अत्र वक्तुं शक्नोमि यत्- वैदिकालीन-कर्षणशैलीं तथा स्मृतिकारमहर्षि -पराशराभिमतमाश्रित्य एकमपि शोधकार्यं मया न प्राप्तम्।

अध्यायभित्तिकालोचनाकाले वेदकालीनकृषिविषयकमतानां महर्षिपराशराभिमतानां समर्थने आधुनिकभारतीयकृषिव्यवस्थाया: संशोधिताभिमतानि उल्लेखितव्यानि आवश्यकतानुसारम्।

5. शोधनपद्धतिः(Methodology)

१. प्रथमे कृषिविषयकमहर्षिपराशराभिमतानां वेदेषु वर्णितमतानां विशदध्ययनं करिष्ये।

२. अध्ययनाधारतः प्रस्तावितशोधविषयेन समं शेधसामग्रिनाम् एकत्रिकरणं करिष्यते।

३. अत्र अस्मिन् प्रस्तावितशोधकार्ये वैदिकाभिमतानां पराशराभिमतानां च समीक्षात्मकमध्ययनपूर्वकम् आवश्यकतानुसारं निरीक्षणपद्धतेः विश्लेषणपद्धतेः तुलनात्मकपद्धतेः व्यक्तिगताध्ययनपद्धतेश्च उपयोगं कृत्वा षटषु अध्यायेषु विभज्य संशोधनकार्यमिदं करिष्यते मया।

6. अध्यायविभाजनम् (Chapter division)

6.1. पृष्ठभूमिः

(भारतीयकृषिराविष्कारस्य इतिहासः)

6.2. वेदकालीनकृषिप्रणाली

(i)ऋग्वैदिककृषिः

(ii)यजुर्वैदिककृषिः

(iii)अथर्ववैदिककृषिः

6.3. महर्षिपराशरकालीनकृषिप्रणाली

(i) पूर्वप्रस्तुतिः

(ii) वीजवपनम्

(iii) परिचर्याः

(iv)कृषिनाशकतत्त्वानि

(v) सस्यानां संग्रहः संरक्षणं च

6.4. आधुनिकभारतीयकृषिप्रणाली

(i) पूर्वप्रस्तुतिः

(ii) वीजवपनम्

(iii) परिचर्याः

(iv)कृषिनाशकतत्त्वानि

(v) सस्यानां संग्रहः संरक्षणं च

6.5. वैदिकाभिमतानां पराशराभिमतानां आधुनिकमतानाञ्च समीक्षणम्

6.6. महर्षिपराशराभिमतानां वर्तमानप्रयोजनीयता

6.1.पृष्ठभूमिः

वैदिककाले कृषिराविष्कारकः राजावेनपुत्रः राजा पृथी पृथुर्वा अकोरत्। वैदिकाभिमतानुसारं राजा पृथी एव कृषिविद्याया आविष्कारकः ।सैव कृषि विद्याद्वारा अनेकप्रकारानाम् अन्नाम् उत्पादनं कृतवान्।प्रसङ्गेऽस्मिन् ऋग्वेदादिषु उक्तम्-

"तां पृथी वैन्योऽधक् तां कृषिं सस्यं चाधोक्।"[3]

"पृथी यद् वां वैन्यः।"[4]

स्मृतिकारः महर्षिपराशराः स्वरचितस्य कृषिपराशरःनाम कृषिशास्त्रस्य कृषिखण्डस्य प्रारम्भिकांशे लिखति यत्- सुवर्ण-रोप्य-मानिक्य-वसनादिभिः पुर्णारपि मनुष्याः कृषकेभ्यः अन्नानां प्रर्थनां कुर्वन्ति भोजनस्य आवश्यकतावशात्, यथा -

"सुवर्णरोप्यमानिक्यवसनैरपि पुरिताः।

तथापि प्रार्थयन्त्येव कृषकान् भक्ततृष्णया।।"[5]

6.2. **वैदिककालीनकृषिप्रणाली :**

ऋग्वैदिककालतः भारतीयभूमौ कृषिकार्यं प्रचलत् आसीत्। वैदिककालीनकृषिशैली नाम अस्मिन् अध्याये कृषिविषये ऋग्-यजु-अथर्ववेदानां कृषिविषयकाभिमतानि क्रमानुसारं विश्लेषण-पूर्वकम् अध्ययनं करिष्यते। यथा-

१.ऋग्वैदिककृषिः

२.यजुर्वैदिककृषिः

३.अथर्ववैदिककृषिः

---

[3] अथर्ववेदः ८.१०(४).११

[4] ऋग्वेदेः ८.९.१०

[5] कृषिपराशरः १.४ प्रो.रामचन्द्रपाण्डेयः,पृ.१७

यथा यजुर्वेदसंहितायां राज्ञः प्रमुखकर्तव्यचतुष्टयं निर्देशितम्- (१) कृषेरून्नतिः (२) जनकल्याणम् (३) राष्ट्रस्य श्रीवृद्धिः (५) स्वराष्ट्राय पुष्टिवर्धनम् इति। यजुर्वेदसंहितायां वर्णितम् यत्-

"कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा।"[6]

कृषिकार्यात् प्राक् मृत्तिकानिर्माणं प्रथमम् कार्यम्, पुनः मृत्तिकानिर्मानाय वृष्टि आवश्यकी, यस्मात् कारणात् अथर्ववेदे भूमिं तथा पर्जन्यं नमस्कृत्य लिखति –

"भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षभेदसे।"[7]

अस्मिन् अध्याये वैदिककृषिशैल्याः विश्लेषणकाले यथाक्रमम् वीजवपनं,सेचकार्यं, सस्यानां परिचर्या,सस्यनां संग्रहः, सस्यानां संरक्षणं च इत्यादयः विषयाः विश्लेषितव्याः।

6.3. महर्षिपराशरकालीनकृषिप्रणाली -

वैदिकसाहित्ये कल्पसूत्राधारभूतं धर्मसूत्रमस्ति एकोऽपरविभागः। धर्मसूत्रानामाधारेण स्मृतिशास्त्राणाम् रचना जाता। तत्र अनेकेषु मनु-याज्ञवल्क्य-नारदादिषु स्मृतिकारेषु महर्षिः पराशरः अन्यतमः। तेन पराशरेन प्राचीनभारतीयकृषिविषये विस्तारेण स्वाभिमतान् प्रकटितम्। अतःअस्मिन् अध्याये विश्लेषणपूर्वकम् स्मृतिकारानां महर्षिपराशराभिमतानाम् अध्ययनं करिष्ये। यथा महर्षिः पराशरः तस्य कृषिः पराशरःनाम कृषिशास्त्रे लिखति,यत् - यथोपयुक्तपरिचर्यया भूमिः सुवर्णमुत्पादयति तथैव परिचर्याभावेन कृषिः निर्धनतां दारिद्रं वा प्रयच्छति सदा-

"फलत्यवेक्षिता स्वर्णं दैन्यं सैवानवेक्षिता।

कृषिः कृषिपुराणज्ञः इत्युवाच पराशरः।।"[8]

---

[6] यजुर्वेदः ९.२२

[7] अथर्ववेदः १२.१.४२

[8] कृषिपराशरः ३.१ प्रो. रामचन्द्रपाण्डेयः,पृ.३६

अस्य श्लोकस्य मुख्यमुद्देश्यं परिप्रेक्ष्य स्वानुभवात् मया वक्तुमिदं शक्यते श्लोकार्थोऽयं ध्येयमन्त्ररुपेण स्वीकृतः समग्रविश्वे कृषकैः। यतः भूमिप्रस्तुतिकरणतः सस्यानां संग्रहपर्यन्तम् उपयुक्तपरिचर्यैव आधुनिकभारतीयकृषिव्यवस्थायाः मूलमन्त्र इत्यत्र नास्ति संशयः। पुनः वातावरणविषये महर्षिपराशरेन उक्तम्- उत्तरपश्चिमदिशाभ्यां यदा वायुः प्रवहति तर्हि वृष्टिः भवति, वायुः पूर्वदक्षिणदिशाभ्यां च यदा प्रवहति तदा अनावृष्टिः भवति। अव्यवस्थितवायुप्रवाहतः वृष्टिरपि अव्यवस्थिता भवति-

"सौम्यवारुणयोर्विष्टिः पूर्वयाम्ययोः।

निर्वाते वृष्टिहानिः स्यात्संकुले संकुलं जलम्।।"[९]

महर्षिपराशराभिमतानां विश्लेषणपूर्वकम् अध्ययनकाले क्रमेण भूमिनिर्वाचनं, वीजवपनं, यथाविधिः परिचर्या, सेचव्यवस्था, विघ्ननिवारणं, सस्यानां संग्रहः संरक्षणं च विश्लेषितव्यं मया।

6.4. आधुनिभारतीयकृषिप्रणाली -

समग्रविश्वस्य कृषिकार्यस्य आधारेण उत्पादितसस्यानां दशभागः प्रतिशतं भारतवर्षे अस्मिन् उत्पद्यन्ते। प्रायशः सप्ततिः प्रतिशतं भारतीयाः कृषिकार्यैः संयुक्ताः। स्वतन्त्रतायाः उत्तरकालत अद्य पर्यन्तं भारतीयाकृषिव्यवस्थायाः विविधपरिवर्तनं जातम्।तत्र जलसेचनव्यवस्थायाः परिवर्तनं लक्ष्यनीयम्- वैदिककाले तथा स्मृतिकाले सस्येषु जलसिंचनमासीत् प्रकृतिनिर्भरम्। विविध-उपायेन यथा नदीजलेन, वृष्टिजलेन,जलाधारस्य जलेन सेचकार्यं प्रचलत् आसीत्।किन्तु आधुनिके कृषिव्यवस्थायां सेचकार्यस्य अभूतपूर्वपरिवर्तनं जातम्। यथा दृश्यते आधुनिकभारतीयकृषिक्षेत्रे जलसेचकार्यार्थम् उन्नतयन्त्रांशानां प्रयोगं क्रियते। तत्र विद्युतः चालितयन्त्रांशेन तथा मृत्तैलचालितयन्त्रेन (Electric motor, pump set) सेचनकार्यं प्रचलति। अनेन सौविध्यम् असौविध्यं च द्वयमेव वर्तते यथा- आवत्सरं सस्येषु निर्विघ्नं सेचकार्यं प्रचलति इति सौविध्यं पुनः अनेन भौमजलस्तरे ह्रासः जायमानः अस्ति इति भूविज्ञानिनां मतम् ।

आधुनिकभारतीयकृषिशैली नाम अस्मिन् चतुर्थाध्याये अद्यतनः कृषिव्यवस्थायाः भूमिनिर्वाचनम्, मृत्तिकानिर्मानम्, वीजवपनम्, सस्यानां परिचर्या, सेचकार्यम्,अन्नानां संग्रहः संरक्षणं च इत्यादयः वर्णिताः भवेयुः।

---

[९] कृषिपराशरः २.२२ प्रो. रामचन्द्रपाण्डेयः,पृ.२६

6.5. वैदिकाभितानां पराशराभिमतानां आधुनिकमतानाञ्च समीक्षणम्-

प्रस्तावितस्य शोधप्रवन्धस्य पञ्चमेऽध्याये अस्मिन् वैदिककालीन-कर्षणशैली-आधुनिकभारतीयकर्षणशैलिभ्यां समीक्षा करिष्यते। यथा वैदिककालीनकृषिनाषकतत्वविषये अथर्ववेदे उल्लेखितम्- अतिवृष्टिरनावृष्टिः विद्युत् सूर्यस्यात्यधिकातपेन च कृषिः विनश्यते **- मा नो वधीर्विद्युता देव सस्यं, वधीः सूर्यस्य रश्मिभिः।अ.७.११.**

मूषिकः मूषिका वा,तर्द,पतंग,जभ्य,उपक्कस च प्रभृतयः वेदे कृषिनाषकतत्वरुपेण स्वीकृताः सन्ति -

हतं तर्द........आखुम्।अ.६.५०.१

तर्द, पतंग,जभ्य,उपक्कस।अ.६.५०.२

न घ्रन् तताप न हिमो जघान।अ.७.१८.२

वर्तमानकृषिव्यवस्थायामपि वेदोक्तकृषिविनाषकतत्त्वानां प्रभावः दृष्यते। कृषिक्षेत्रतः कीटपतङ्गादिनिवारनार्थं विविधकीटनाशकौषधिप्रयोगे कृषिविशेषज्ञाः उपदिश्यन्ते। हिमपातः अद्यावधि सस्यानामुपरि हानिकारकप्रभावं विस्तारयति, अत्र भूभागानां वातावरणम् अनुसृत्य अन्नानामुतपादने निर्दिश्यते आधुनिकैः कृषिविशेषज्ञैः।पुनः महर्षिपराशराभिमतानामपि सम्यक् परिपालनं वर्तमानकृषिक्षेत्रे दृश्यते। वीजसंग्रहविषये महर्षिणा उक्तम् -

भ्रमवशादपि कृषकः कदापि संगृहीतवीजानामुपरि घृततैलप्रदीप-लवणादिन् न स्थापयेत् –

घृतं तैलं च तक्रं च प्रदीपं लवणं तथा।

वीजोपरि भ्रमेणापि कृषिको नैव कारयेत्।।[10]

---

[10] कृषपराशरः ३.८२ प्रो. रामचन्द्रपाण्डेयः,पृ.४९

6.6. महर्षिपराशराभिमतानां वर्तमानप्रयोजनीयता-

आधुनिकभारतीयकृषिव्यवस्थायां वैदिकाभिमतानां तथा महर्षि-पराशराभितानां कियदस्ति प्रयोजनम् इति अनेन पराशराभिमतेन ज्ञायते, यत् -

"कृषिर्धन्या कृषिर्मेध्या जन्तुनां जीवनं कृषिः।

हिंसादिदोषयुक्तोऽपि मुच्यतेऽतिथिपूजनात्।।"[11]

अर्थात् कृषिः धन्यः पवित्रश्च भवति। कृषिरेव प्राणिनां जीवनम् । कृषकः हिंसादिदोषयुक्तोऽपि अतिथिपूजनात् दोषेभ्यः मूक्तर्भवति।येन पूजितः अतिथयः तेन पूजितं जगत् अर्चितश्च सर्वे देवाः सैव कृषकः पुरुषोत्तमः -

"तेनार्चितं जगत् सर्वमतिथिर्येन पूजितः।

अर्चितास्तेन देवाश्च सः एव पुरुषोत्तमः।।"[12]

अनेन महर्षिपराशराभिमतेन प्रायशः सर्वे भारतीयकृषकाः कृषेः अभिमुखाः भवेयुः इति मम विश्वासः। यतः पुण्यमिच्छन्ति सर्वे लोके पापं नैव नराधमारपि इति।

❖ उपसंहारः-

कृषिविषयकवैदिकाभिमतानां तथा महर्षिपराशराभिमतानां समीक्षापूर्वकं विश्लेषणात्मकम् अध्ययनात् परं ज्ञायते यत् - आधुनिकभारतीयकृषिव्यवस्थायां कृषकानां पुरतः ये विघ्नाः उत्पद्यन्ते प्रायशः तेषां वहूनां स्वल्पमपि समाधानं ऋषिमहर्षिभिः पूर्वमेव वेदादिशास्त्रेषु प्रदर्शितं तेषां विचारतः।परन्तु तेषां सर्वेषाम् अभिमतानां सम्यक् परिपालनं न सम्भवेत्। आधुनिककृषिः केवलं सस्यानां उत्पादनाय न स्थिरः। आधुनिककृषिः कृषकानां सर्वतः समृद्धिलाभार्थम् एकः साधक अस्ति।

[11] कृषिपराशरः १.८ प्रो. रामचन्द्रपाण्डयः पृ.१८

[12] कृषिपराशरः १.९ प्रो. रामचन्द्रपाण्डयः पृ.१८

वैदिकाभिमतानामाधारेण ज्ञायते त्रिषु कालेषु कृषिः सदैव आदरणीय आसीत् अस्ति भवेत् च। वैदिककालीनकृषिः तथा स्मृतिकालीनकृषिः पूर्णतया प्रकृतिनिर्भरः आसीत्। आधुनिककृषिरपेक्षया वैदिककालीनकृषेः प्राकृतिकपरिवेशस्य प्राकृतिकवातावरणस्य च भारसाम्यरक्षार्थम् अधिकः उपयोगिता विद्यते।

सहायकग्रन्थसूची

१. ऋग्वेदः(डॉ.गंगासहापशर्मा, संस्कृतसाहित्यप्रकाशनम् -२०१६)

२. ऋग्वेदपरिचयः(हृदयनारायणदीक्षितः, वाणी प्रकाशनम्-२०२०)

३. ऋक्सूक्तमनिमाला (डॉ.व्रजबिहारीचैबे,कात्ययनवैदिकसाहित्पप्रकाशनम्-२०१०)

५. यजुर्वेदः(डॉ. रेखा व्यासः, संस्कृतसाहित्यप्रकाशनम् -२०१५)

६. अथर्ववेदः (डॉ.गंगासहायशर्मा, संस्कृतसाहित्यप्रकाशनम् -२०१५)

७. अथर्ववेदसंहिता (श्रीदिलीपमूखोपाध्धायः,अक्षयलाइवेरी, कलकाता -२०१८)

८. कृषिपराशरः (प्रो.रामचन्द्रपाण्डेयः,मोतिलालवनारसीदास-श्रीजैनेन्द्रप्रेसः-२००२)

९. कृषिविज्ञान के मूलभूत सिद्धान्त (अरुणकात्यायनः,कितावमहल -२०२०)